सप्तमीपञ्चम्यौ कारकमध्ये ॥ ७ ॥ पदानि ॥ सप्तमी-पञ्चम्यौ, कारक-मध्ये, (कालाध्वनोः०) ॥

वृत्तिः ॥ कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमी पञ्चम्यौ विभक्ती भवतः ॥

7. A noun denoting time or place gets the affix of the seventh or the fifth case, when the sense implied is that the time or space is the interval between one action and another action (or implies an interval of time and space between two kârakas).

Ex. अद्य भुक्त्वा देवदत्तो द्व्यहे द्व्यहाद्भोक्ता 'having dined today, Devadatta will dine in or after two days.' Here the 'time' is the interval between the agent and his power of eating. So also इहस्थोऽयमिष्वासः क्रोशात् क्रोशे वा लक्ष्यं विध्येत् 'standing here, he will hit a mark at the distance of one kos.' Here kos is the interval between the agent and the object, or the object and the ablation, or the object and the location. The rule I. 3. 10 does not apply here.

कर्मप्रवचनीययुक्ते द्वितीया ॥ ८ ॥ पदानि ॥ कर्मप्रवचनीय-युक्ते, द्वितीया ॥

वृत्तिः ॥ कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति ॥

8. The second case-affix is employed after a word which is joined with a karmapravachanîya (I. 4. 83),

Ex. शाकल्यस्य संहितामनुप्रावर्षत् 'It rained on (hearing) the reading of the Veda by Sâkalya.' So also आगस्त्यमन्वसिंचत् प्रजाः ॥

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ ९ ॥ पदानि ॥ यस्माद्-अधिकं, यस्य, च, ईश्वर-वचनं, तत्र, सप्तमी, (कर्मप्रवचनीययुक्ते) ॥

वृत्तिः ॥ यस्मादधिकं यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति ॥

9. Where a word is governed by a karmapravachanîya in the sense of 'more than' (I. 4. 87) or 'lord of' (I. 4. 97) there the 7th case- affix (locative) is employed.

Ex. उपखार्याम् द्रोणः 'A Drona is more than a Khâri,' अधिब्रह्मदत्ते पंचालाः 'Brahmadatta is the lord of Panchâlas.' The phrase यस्यचेश्वर वचनं indicates that both the thing owned and the owner may be in the locative. See I. 4 97.

This aphorism debars the accusative.

पञ्चम्यपाङ्परिभिः ॥ १० ॥ पदानि ॥ पञ्चमी, अप-आङ्-परिभिः, (कर्मप्रवचनीययु०) ॥

वृत्तिः ॥ अप आङ् परि इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी विभक्तिर्भवति ॥

10. The fifth case-affix (Ablative) is employed when a word is governed by the following karmapravachanîyas i. e. apa, âñ and pari.

Ex. अप or आ or परि पाटलिपुत्राद्वृष्टो देवः 'It rained off or upto or with the exclusion of, Pâtaliputra.'

The परि here has the meaning of 'exclusion' (I. 4. 88) being read along with अप; therefore, not here वृक्षं परि विद्योतते विद्युत् (I. 4. 90).

प्रतिनिधिप्रतिदाने च यस्मात् ॥ ११ ॥ पदानि ॥ प्रति-निधि-प्रतिदाने, च, यस्मात् (कर्मप्र०) (पञ्चमी) ॥

वृत्तिः ॥ यस्मात्प्रतिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिर्भवति ॥

11. The 5th case-affix (ablative) is employed after what soever is governed by a karmapravachanîya in the sense of 'substitute' or 'exchange' (I. 4. 92).

Ex. अभिमन्युरर्जुनतः प्रति 'Abhimanyu is the representative of Arjuna.' माषानस्मैतिलेभ्यः प्रतियच्छति 'he exchanges mâshâs for this sesamum.' See I. 4. 92 for an explanation of प्रतिनिधि and प्रतिदान.

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ १२ ॥ पदानि ॥ गत्यर्थ-कर्मणि, द्वितीया-चतुर्थ्यौ, चेष्टायाम्, अनध्वनि ॥

वृत्तिः ॥ गत्यर्थानां धातूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारकेऽध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः

12. In the case of roots implying motion, the place to which motion is directed takes the affix of the 2nd (Accusative) or the 4th (Dative) case in denoting the 'object,' when physical motion is meant, and tho object is not a word expressing 'road'.

Ex. ग्रामं or ग्रामाय गच्छति 'he goes to the village.' But not so in मनसा हरिं व्रजति (the verb not denoting physical motion) 'he goes mentally to Hari' अध्वानं गच्छति 'he goes over the way' (the object being the 'way'). But not so in ओदनं पचति 'he cooks rice;' (the verb not denoting 'motion)' nor in अश्वेन व्रजति (the verb not denoting 'the object.')

Note:—The word adhvan includes the synonyms of road (I. 1. 68) as पन्थानं गच्छति, मार्गं गच्छति.

Note:—The prohibition applies with regard to the going over or occupying the road; so that where a person from a wrong road goes to the right road, there the fourth case-affix will be employed as पथे गच्छति.

चतुर्थी संप्रदाने ॥ १३ ॥ पदानि ॥ चतुर्थी, संप्रदाने ॥

वृत्तिः ॥ संप्रदाने कारके चतुर्थी विभक्तिर्भवति ॥
वार्त्तिकम् ॥ चतुर्थी विधाने तादर्थ्ये उपसंख्यानम् ॥
वार्त्तिकम् ॥ क्लृपिसंपद्यमाने चतुर्थी वक्तव्या ॥
वार्त्तिकम् ॥ उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या ॥
वार्त्तिकम् ॥ हितयोगे चतुर्थी वक्तव्या ॥

13. In denoting the sampradâna-kâraka (I. 4. 32) the fourth affix or the Dative is employed after the noun.

Ex. उपाध्यायाय गां ददाति 'He gives a cow to the teacher' देवदत्ताय रोचते 'it pleases Devadatta' (I. 4. 33) पुष्पेभ्यः स्पृहयति (I. 4. 36) 'he desires flowers.'

Vart:—The fourth case-affix should be employed when the sense is that of 'for the purpose thereof' as यूपाय दारु 'wood is for making posts.' कुण्डलाय हिरण्यं 'gold used for the purpose of making ear-ring.' रन्धनाय स्थाली 'pot for the sake of cooking.' अवहननायोलूखलं 'mortar for the sake of threshing.'

Vart:—The verb क्लृप and other verbs meaning 'to be fit or adequate for, result in, bring about, accomplish, produce, tend to,' govern the dative case: as, मूत्राय कल्पते यवागूः 'the barley gruel tends to produce urine.' So also मूत्राय संपद्यते जायते वा यवागूः.

Vart:—The fourth case-affix is employed with the force of 'indicating a portent or calamity,' as.

वाताय कपिला विद्युदातपायातिलोहिनी ॥

पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

'The reddish lightening portends wind, extremely red indicates heat, yellow portends rain and white lightening prognosticates famine.'

Vart:—The fourth case-affix should be employed in connection with the word हितः as गोभ्योहितं 'good for cows.'

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ १४ ॥ पदानि ॥ क्रिया-अर्थ-उपपदस्य, च, कर्मणि, स्थानिनः, (चतुर्थी) ॥

वृत्तिः ॥ क्रियार्थोपपदस्य च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति ॥

14. The fourth case-affix is employed in denoting the object (karma) of that verb, which is suppressed (sthâni) in a sentence, and which has in construction (upapada) therewith another verb, denoting an action, performed for the sake of the future action (kriyârthe III. 3. 10).

In other words, when the sense of an infinitive of purpose formed by 'tumun' and 'nvul' (III. 3. 10,) is suppressed in a sentence, the object of this infinitive is put in the Dative case.

फलेभ्यो व्रजति = फलान्याहर्तुं व्रजति 'he goes for fruits *i. e.*, to bring fruits.' This debars accusative case. So also we have एधेभ्यः व्रजति 'he goes for fuel.' The words क्रियार्थोपपदस्य and स्थानिनः are in apposition. The first is a Bahuvrîhi compound of क्रियार्थ + उपपद and means 'a verb whose upapada denotes the purpose of the action (kriyârtha).' Thus in एधानाहर्तुम् 'to bring fuel'; the infinitive verb आहर्तुम् is क्रियार्थोपपद, the object of this verb is एधः; when this verb is suppressed, it becomes स्थानिनः; the object of this verb takes the fourth case-affix.

Why do we say 'of the verb whose upadada denotes the purpose of the action?' Observe प्रविश पिंडीम्.

Why do we say 'in denoting the object.' Witness एधेभ्यो व्रजति शकटेन 'for fuel he goes with a cart.'

Why do we say 'when suppressed'? Observe एधानाहर्तुं व्रजति.

तुमर्थाच्च भाववचनात् ॥ १५ ॥ पदानि ॥ तुम-अर्थात्, च भाव-वचनात्, (चतुर्थी) ॥

वृत्तिः ॥ तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्तिर्भवति ॥

15. The fourth case-affix is employed after a crude-form which ends in an affix denoting 'condition' (abstract noun, III. 3. 11.) and having the force of the affix tum (or Infinitive of purpose).

Ex. यागाय व्रजति 'he goes to offer a sacrifice' = यष्टुं व्रजति. So also त्यागाय व्रजति, भूतये व्रजति.

The word तुमर्थ means 'having the same significance as the affix तुम्'.

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥ १६ ॥ पदानि ॥ नमः-स्वस्ति-स्वाहा-स्वधा-अलम्-वषड्-योगात्; च, (चतुर्थी) ॥

वृत्तिः ॥ नमः स्वस्ति स्वाहा स्वधा अलं वषट् इत्येतैर्योगे चतुर्थी विभक्तिर्भवति ॥

16. The fourth case-affix is employed in conjunction with the words namah 'salutation,' svasti 'peace,' svâhâ, svadhâ (terms used in offering oblations to Gods and Pitris respectively), alam 'a match for' 'sufficient for' and vashaṭ a term of oblation.

Ex. नमो देवेभ्यः, स्वस्ति प्रजाभ्यः, स्वाहाऽग्नये, स्वधा पितृभ्यः, अलं मल्लो मल्लाय 'Salutation to Gods'; 'peace to the people'; 'svâhâ to fire'; 'svâdhâ to the Pitṛis'; 'an athlete is a match for an athlete' &c. The word अलं includes its synonyms also, as प्रभुः, शक्तः &c.; so वषडिन्द्राय, वषडग्नये.

The च indicates that the Dative will debar Genitive, in spite of II. 3. 73, in the case of these words, though used benedictivley; as, स्वस्ति गोभ्यो भूयात् ॥

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ॥ १७ ॥ पदानि ॥ मन्य-कर्मणि, अनादरे, विभाषा, अप्राणिषु, (चतुर्थी) ॥

वृत्तिः ॥ मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्ति र्भवति अनादरे गम्यमाने ॥

वार्त्तिकम् ॥ यद्येतदप्राणिष्विति तदनावादिष्विति वक्तव्यम् ॥

17. In denoting the indirect object, which is not an animal, of the verb manya 'to think,' the dative case is optionally employed, when contempt is to be shown.

Ex. न त्वा तृणं तृणाय वा मन्ये 'I do not consider thee worth a straw.' न त्वा बुसं बुसाय वा मन्ये 'I do not consider thee worth a chaff.' Why do we use the word मन्ये? Observe न त्वा तृणं चिन्तयामि. The optional dative will not be employed with the synonyms of the verb मन्यति. So also the sûtra uses the form मन्य with the vikarana श्यन्, indicating that it is Divâdi that governs a dative, and not the Tanâdi मन्; for the latter governs the accusative only, as न त्वां तृणं मन्वे.

When contempt is not meant, the verb does not govern the Dative, as:—

अश्मानं दृषदं मन्ये, मन्ये काष्ठमुलूखलम्। अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

'I consider a rock to be a stone, I consider mortar but as wood, I consider him to be the son of a blind woman whose mother cannot see.'

So also when the object of comparison is an animate being, it will not take the dative:—as न त्वां शृगालं मन्ये 'I do not consider thee even as a jackal.' The case of न त्वां शुने मन्ये is an exception.

Vart:—Instead of using अप्राणिषु in the sûtra, the word अनावादिषु should be used. The following words belong to Nâvâdi class, they are always in the accusative after the word मन्ये, never in the Dative:—नौ 'ship,' काक 'crow,' अन्न 'food,' शुक 'parrot,' and शृगाल 'jackal.'

कर्तृकरणयोस्तृतीया ॥ १८ ॥ पदानि ॥ कर्तृ-करणयोः तृतीया ॥

वृत्तिः ॥ कर्तरि करणे च कारके तृतीया विभक्तिर्भवति ॥

वार्त्तिकम् ॥ तृतीया विधाने प्रकृत्यादीनामुपसंख्यानम् ॥

18. In denoting the agent (I. 4. 54) or the instrument (I. 4. 42), the third case-affix is employed.

Ex. देवदत्तेन कृतं 'done by Devadatta,' दात्रेण लुनाति 'he cuts with the sickle.' So also, यज्ञदत्तेन भुक्तम्, परशुना छिनत्ति ॥

Vart:—The following words take the 3rd case. प्रकृति 'original,' प्राय 'almost,' गोत्र 'gotra,' सम 'equal,' विषम 'unequal,' द्विद्रोण, पंचक and साहस as प्रायेण याज्ञिकः, गार्ग्योऽस्मि गोत्रेण, समेन or विषमेण धावति, द्विद्रोणेन क्रीणाति &c.

सहयुक्तेऽप्रधाने ॥ १९ ॥ पदानि ॥ सहयुक्ते, अप्रधाने, (तृतीया) ॥

वृत्तिः ॥ सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिर्भवति ॥

19. When the word सह 'with,' is joined to a word, the latter takes the third case, when the sense is that the word in the third case is not the principal but the accompaniment of the principal thing.

Ex. पुत्रेण सहागतः पिता 'the father has come with the son.'

The same will be the result with the synonyms of सह as, पुत्रेण सार्द्धं 'with the son.' So also when the word सह is understood, as Pâṇini himself uses in I. 2. 65 वृद्धो यूना &c.,

Why do we say 'when not the principal.' Observe, शिष्येण सहोपाध्यायस्यगौः.

येनाङ्गविकारः ॥ २० ॥ पदानि ॥ येन, अङ्ग-विकार, (तृतीया) ॥

वृत्तिः ॥ येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति ॥

20. By whatsoever limb, being defective, is pointed out the defect of the person, after that the third case-affix is employed.

As, अक्ष्णा काणः 'blind of one eye' पादेन खंजः 'lame of foot.' पाणिना कुण्ठः &c. The word aṅga in this sûtra applies to the whole body, whatsoever by reason of being a member of the body is defective is indicated here.

इत्थंभूतलक्षणे ॥ २१ ॥ पदानि ॥ इत्थंभूत-लक्षणे, (तृतीया) ॥

वृत्तिः ॥ कंचित्प्रकारं प्राप्त इत्थंभूत, तस्य लक्षणमित्थं भूतलक्षणं, ततस्तृतीया विभक्तिर्भवति ॥

21. Any mark or attribute, by which is indicated the existence of a particular state or condition, is put in the third case to express this relation.

जटाभिस्तापसः 'he is an ascetic by (the fact of his having) matted hair.' अपि भवान् कमण्डलुना छात्रमद्राक्षीत् 'your honor might see the student by the fact of his having a kamandalu.' So also छात्रैरुपाध्यायम् 'a teacher by the fact of having students.' शिखया परिव्राजकम् 'a Parivrâjaka by a tuft of hair.' But not so here, कमण्डलुपाणिश्छात्रः 'a student. has kamandalu in his hand.' Because here in the compound कमण्डलुपाणि is hidden the mark.

Why do we say ittha-bhuta? Observe वृक्षं प्रति विद्योतनं।

संज्ञोऽन्यतरस्यां कर्मणि ॥ २२ ॥ पदानि ॥ सम्-ज्ञः, अन्यतरस्यां, कर्मणि, (तृतीया) ॥

वृत्तिः ॥ संपूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्ति र्भवति ॥

22. After the verb sam-jñâ the third case-affix is optionally employed in denoting the object.

पित्रा or पितरं संजानीते 'he knows his father.' मात्रा or मातरं संजानीते ॥

हेतौ ॥ २३ ॥ पदानि ॥ हेतौ, (तृतीया) ॥

वृत्तिः ॥ फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते ; तद्वाचिनस्तृतीया विभक्तिर्भवति ॥

23. When a word denotes 'cause,' it takes the third case affix.

विद्यया यशः 'by learning there is produced fame.' धनेन कुलम् 'by wealth, family;' कन्यया शोकः 'by daughter there is grief.'

The word हेतु here is used in its popular sense and not the grammatical hetu (I. 4. 55). Any thing capable of accomplishing a desired object is called hetu.

अकर्तर्यृणे पञ्चमी ॥ २४ ॥ पदानि ॥ अकर्तरि, ऋणे, पञ्चमी, (हेतौ) ॥

वृत्तिः ॥ कर्तृवर्जितं यदृणं हेतुस्ततः पञ्चमी विभक्तिर्भवति ॥

24. A word, implying debt, considered as a 'cause' but not as a kartṛi or agent, takes the fifth case-affix.

Ex. शताद्बद्धः 'he has been bound on account of a debt of a hundred pieces.'

Why do we say 'when not denoting the agent?' Observe शतेन बन्धितः; 'a debt of hundred has thrown him in prison'; here शत being considered as a prayojaka hetu, is an agent and takes the third case-affix.

विभाषा गुणेऽस्त्रियाम् ॥ २५ ॥ पदानि ॥ विभाषा, गुणे, अस्त्रियाम्, (हेतौ पञ्चमी) ॥

वृत्तिः ॥ गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी विभक्तिर्भवति ॥

25. The fifth case-affix is employed optionally when the noun expresses an attribute, being the cause of an action, and not being of the feminine gender.

Ex. जाड्येन जाड्यात् वा बद्धः 'he has been bound by reason of his dullness.' पांडित्येन or पांडित्यात् मुक्तः 'saved through learning.'

Guṇa-vachana nouns are generally abstract nouns. Therefore not here धनेन कुलम्. If an abstract noun is of feminine gender, this rule will not apply, as बुद्ध्या or प्रज्ञया मुक्तः 'he was set at liberty on account of his skill or wisdom.'

षष्ठी हेतुप्रयोगे ॥ २६ ॥ पदानि ॥ षष्ठी, हेतु-प्रयोगे ॥

वृत्तिः ॥ हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति ॥

26. The sixth case-affix is employed after a noun implying the cause of an action, when the word hetu is used along with such a word.

Ex. अन्नस्य हेतो र्वसति 'he dwells for the sake of food.'

सर्वनाम्नस्तृतीया च ॥ २७ ॥ पदानि ॥ सर्वनाम्नः तृतीया, च, (हेतुप्रयोगे) (षष्ठी) ॥

वृत्तिः ॥ सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च ॥

वार्त्तिकम् ॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् ॥

27. After a sarvanâman (I. 1. 27) when it signifies the cause of an action, and the word hetu is used with it, the third case-affix is employed, as well as the sixth.

Ex. कस्य or केन हेतुना वसति 'for the sake of what does he live?' यस्य or येन हेतुना वसति.

Vart;—When the words निमित्त or कारण are so used, almost all the case affixes may be employed; as किं निमित्तं or केन निमित्तेन or कस्मै निमित्ताय or कस्मात् निमित्तात् or कस्य निमित्तस्य or कस्मिन् निमित्ते वसति. Similarly with the words

kârana and hetu. Here also the word हेतु does not mean the word-form hetu (I. 1. 68) but its synonyms also; as किं प्रयोजनं or केन प्रयोजनेन or कस्मै प्रयोजनाय &c., वसति .

अपादाने पञ्चमी ॥ २८ ॥ पदानि ॥ अपादाने , पञ्चमी ॥

वृत्तिः ॥ अपादाने कारके पञ्चमी विभक्तिर्भवति ॥

वार्त्तिकम् ॥ पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् ॥

वार्त्तिकम् ॥ अधिकरणे चोपसंख्यानम् ॥

वार्त्तिकम् ॥ प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या ॥

वार्त्तिकम् ॥ यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या ॥

वार्त्तिकम् ॥ तद्युक्तात्काले सप्तमी वक्तव्या ॥

वार्त्तिकम् ॥ अध्वनः प्रथमा सप्तमी च वक्तव्या ॥

28. When the Apâdâna-kâraka (I. 4. 24) is denoted, the fifth case-affix is employed.

Ex. ग्रामादागच्छति 'he comes from the village' (I. 4. 24); वृकेभ्यो बिभेति (I. 4 25), अध्ययनात् पराजयते (I. 4. 26) &c.

Vart:—The fifth case-affix is employed in denoting the object, when the verbal participle ending in ल्यप् is elided; as प्रासादमारुह्य प्रेक्षते = प्रासादात् प्रेक्षते 'he sees from a palace.'

Vart:—And under similar circumstances in denoting the location the place where an action is performed is put in the ablative case, as, आसने उपविश्य प्रेक्षते = आसनात् प्रेक्षते 'he sees from a seat.'

Vart:—In questions and answers, the fifth case-affix is employed:—कुतो भवान्? पाटलिपुत्रात् 'whence is your Honor coming? From Patali putra.'

Vart:—That point of time or space from which distance in time or space is measured is put in the ablative case:—as, गवीधुमतः सांकाश्यं चत्वारि योजनानि 'Sankâsya is from Gavîdhuma four yojanas.' कार्त्तिक्या आग्रहायणी मासे 'Agrahâyana is one month from Kârtika. The word denoting the distance in time is put in the locative case, as मासे .

Vart:—In the above the word denoting the distance in space may be put either in the nominative or locative; as गवीधुमतः सांकाश्यं चत्वारि योजनानि or चतुर्षु योजनेषु ।

अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २९ ॥ पदानि ॥ अन्य-आरात्-इतर-ऋते-दिक्शब्द-अञ्चू-उत्तरपद-आच्-आहियुक्ते , (पञ्चमी) ॥

वृत्तिः ॥ अन्य आरात् इतर ऋते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्योगे पञ्चमी विभक्तिर्भवति ॥

29. When a noun is joined with words meaning 'other than' or with ârât 'near or remote' or itara 'different from' or ṛite 'without,' or words indicative of the 'directions' (used also with reference to the time corresponding to them) or with words having añchu 'to bend' as the last member of the compound (and expressive of direction), or with words ending with the affix âch or âhi (V. 3. 36 and 37) the fifth case-affix is employed.

Ex. अन्यो, भिन्नो, इतरो, अर्थान्तरं, विलक्षणो वा देवदत्तात् 'different from Devadatta' आरात् देवदत्तात् 'remote from or near to Devadatta.' The word ârât meaning 'near or remote' would have taken the sixth case-affix by sûtra 34, but this enjoins 5th case-affix. ऋते देवदत्तात् 'excepting Devadatta.' पूर्वो ग्रामात् 'east of the village,' उत्तरो ग्रामात् 'north of the village,' पूर्वो ग्रीष्मात् वसन्तः 'the spring is prior to summer' प्राक् प्रत्यग्वा ग्रामात् 'to the east or west of the village' दक्षिणा दक्षिणाहि वा ग्रामात् 'to the south or in the eastern direction of the village.'

The words like प्राक् &c., formed from the verb añchu are also दिक्शब्दः; their separate enumeration shows that the sixth case-affix ordained by the next sûtra does not come after them.

षष्ट्यतसर्थप्रत्ययेन ॥ ३० ॥ पदानि ॥ षष्ठी, अतसर्थप्रत्ययेन ॥

वृत्तिः अतसर्थेन प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति ॥

30. The sixth case-affix is employed when used in connection with words ending with affixes having the sense of the affix atasuch (V. 3. 28).

The affix अतसुच् is ordained by V. 3. 28.

Ex. ग्रामस्य दक्षिणतः उत्तरतः पुरस्तात् उपरि वा 'to the south or north, fore most, in or above the village.'

एनपा द्वितीया ॥ ३१ ॥ पदानि ॥ एनपा, द्वितीया ॥

वृत्तिः ॥ एनबन्यतरस्यामदूरे पञ्चम्या इति वक्ष्यति । तेन युक्ते द्वितीया विभक्तिर्भवति ॥

31. With a word ending with the affix 'enap' (V. 3. 35), the second case-affix is employed as well as the sixth.

Ex. दक्षिणेन ग्रामम् ग्रामस्य वा 'south of the village.'

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ॥ ३२ ॥ पदानि ॥ पृथग्-विना-नानाभिः , तृतीया , अन्यतरस्याम् , (पञ्चमी) ॥

वृत्तिः ॥ पृथक् विना नाना इत्येतैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां पञ्चमी च ॥

32. When joined with the words prithak 'without,' vinâ 'without' and nânâ 'without' the third case-affix is employed, optionally (as well as the fifth and the second).

Ex रामाद्रामेण रामं वा विना पृथग् नाना वा ' without or different from Râma.'

This sûtra may be divided into two parts:—(1) पृथग् विना नानाभिः (2) तृतीयाऽन्यतरस्याम् . By this arrangement we can read dvitiya into the aphorism.

विना वातं विना वर्षं विद्युत्प्रपतनं विना ।

विना हस्ति कृतान्दोषान् केनेमौ पातितौ द्रुमौ ॥

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ ३३ ॥ पदानि ॥ करणे , च , स्तोक-अल्प-कृच्छ्र-कतिपयस्य , असत्त्ववचनस्य , (तृतीया-पञ्चमी-अन्यतरस्यां) ॥

वृत्तिः ॥ स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारकेऽन्यतरस्यां तृतीया भवति पक्षे पञ्चम्येव ॥

33. When expressing an instrument-kâraka, optionally after the words stoka 'little,' alpa 'little,' krichchhra 'difficulty,' and katipaya 'some,' the fifth case-affix is used, when they do not denote material objects.

Ex. स्तोकात् स्तोकेन वा मुक्तः and अल्पान्मुक्तः or अल्पेनमुक्तः &c, 'he got off easily &c. But स्तोकेन विषेन हतः, अल्पेन मधुना मत्तः &c. 'killed by a little poison.' No option allowed, as it qualifies a substance. So also स्तोकं मुंचति 'he loosens a little.' Here स्तोक is used as an adverb and not as an instrument (करण).

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ ३४ ॥ पदानि ॥ दूर-अन्तिक-अर्थैः , षष्ठी , अन्यतरस्याम् , (पञ्चमी) ॥

वृत्तिः ॥ दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवति अन्यतरस्यां पञ्चमी च ॥

34. When in conjunction with words having the sense of dûra 'distant,' and antika 'near,' the sixth case-affix is optionally employed.

Ex. ग्रामात् ग्रामस्य वा वनं दूरं विप्रकृष्टं, अन्तिकं, अभ्याशं, निकटं समीपं वा 'the forest is distant from or near to the village.'

The force of the word अन्यतरस्यां is to indicate that the 5th case-affix employed in the alternative, would have run into this sûtra, had we not used 'anyatarasyam.'

दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३५ ॥ पदानि ॥ दूर-अन्तिक-अर्थेभ्यः, द्वितीया, च, (पञ्चमी) ॥

वृत्तिः ॥ दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति चकारात्पञ्चमी तृतीयापि समुच्चीयते ॥

35. After the words having the sense of dûra 'distant,' and antika 'near,' the second case-affix is used as well as the fifth and the third.

Ex. दूरं दूराद् दूरेण वा ग्रामस्य and अन्तिकात्, अन्तिकेन or अन्तिकं ग्रामस्य.

This rule applies only when these words have their original signification and do not denote a substance. Otherwise the proper case-affix should be employed, as दूरः पन्थाः, दूराय पथे देहि.

सप्तम्यधिकरणे, च, ॥ ३६ ॥ पदानि ॥ सप्तमी, अधिकरणे, च, (दूरान्तिकार्थेभ्यः) ॥

वृत्तिः ॥ सप्तमी विभक्तिर्भवत्यधिकरणे कारके चकारा दूरान्तिकार्थेभ्यश्च ॥

वार्त्तिकम् ॥ सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् ॥

वार्त्तिकम् ॥ साध्वसाधुप्रयोगे च सप्तमी वक्तव्या ॥

वार्त्तिकम् ॥ कारकार्हाणां चा कारकत्वे सप्तमी वक्तव्या ॥

वार्त्तिकम् ॥ अकारकार्हाणां चा कारकत्वे सप्तमी वक्तव्या ॥

वार्त्तिकम् ॥ तद्विपर्यासे च सप्तमी वक्तव्या ॥

वार्त्तिकम् ॥ निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या ॥

36. The seventh case-affix is employed when the sense is that of location (I. 4. 45) as well as after the words meaning 'distant' or 'near'.

Ex. कटे आस्ते 'he sits on the mat' अन्तिके दूरे वा ग्रामस्य 'near or distant from the village.' स्थाल्यां पचति 'he cooks in the pot.' Thus the words दूर and अन्तिक take four case-affixes, namely the second, third, fifth and seventh.

Vart:—Words like अधीतिन् 'who has learnt,' गृहीतिन् 'who has comprehended;' *i. e.*, words formed by adding इन् to the past participle in क्त, govern the locative of that which forms their object:—as अधीती व्याकरणे 'versed in Grammar.' परिगणिती याज्ञिके 'well versed in sacrificial rites.' आम्नाती छन्दसि 'well read in the Veda.' See V. 2. 88.

Vart:—The words साधु and असाधु govern the locative of that towards whom goodness or otherwise is shown; as मातरि साधुरसाधुर्वा 'well behaved or ill-behaved towards his mother.'

Vart:—The Locative absolute is used in cases other than those specified in the next sûtra, namely, in cases where the action done or suffered does not indicate the time of another action; as ऋद्धेषु भुञ्जानेषु दरिद्रा आसते 'the poor are sitting, while the rich are eating,' दरिद्रेषु आसीनेषु ऋद्धा भुञ्जते 'the rich are eating, while the poor being seated.' So also *vice versa*.

Vart:—The Locative is sometimes used to denote the object or purpose for which anything is done; as.

चर्मणि द्वीपिनं हंति, दंतयोर्हन्तिकुंजरम्।
केशेषु चमरीं हंति सीम्नि पुष्कलको हतः॥

'Man kills the tiger for his skin, the elephant for his tusks, the chamari cow for her hair, and the musk-deer for its musk.'

यस्य च भावेन भावलक्षणम् ॥ ३७ ॥ पदानि ॥ यस्य, च, भावेन, भाव-लक्षणम्, (सप्तमी) ॥

वृत्तिः ॥ भावः क्रिया। यस्य च भावेन यस्य च क्रिययाक्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति ॥

37. By the action (bhava) of what-soever, the time of another action is indicated, that takes the seventh case-affix.

This is Locative Absolute. गोषु दुह्यमानासु गतः 'the cows being milked, he went away' दुग्धास्वागतः 'and returned when they were milked' अग्निषु हूयमानेषु गतः, हुतेष्वागतः.

Why do we say 'by the action of whatsoever'? Observe यो जटाभिः स भुंक्ते. Why have we used the word 'action' twice? Witness यो भुंक्ते स देवदत्तः.

षष्ठी चानादरे ॥ ३८ ॥ पदानि ॥ षष्ठी, च, अन्-आदरे, (सप्तमी, भावेन भावलक्षणम्) ॥

वृत्तिः ॥ अनादराधिक्ये भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः ॥

38. The sixth case-affix is employed (as well as the seventh), when disregard is to be shown, after that by whose action the time of another action is indicated.

This is Genitive Absolute. रुदतः रुदति वा प्राव्राजीत् 'in spite of her weeping, he went away.' The force of this genitive is that of the English words 'not-with-standing' 'in spite of' 'for all,' &c., नन्दाः पशव इव हताः पश्यतो राक्षसस्य 'the

Nândas were killed like so many beasts, Rakshasa looking on,' (not-withstanding that Rakshasa was looking on).

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ३९ ॥ पदानि ॥ स्वामिन्-ईश्वर-अधिपति-दायाद-साक्षिन्-प्रतिभू-प्रसूतैः, च, (षष्ठी सप्तमी) ॥.

वृत्तिः ॥ स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैर्योगे षष्ठी सप्तमी विभक्ती भवतः ॥

39. The sixth and the seventh case-affixes are used after words when they are joined with svâmin 'master,' îśvara 'lord,' adhipati 'ruler,' dâyâda 'an heir,' sâkshin 'witness,' pratibhû 'a surety,' and prasûta 'begotten.

गवां गोषु वा स्वामी or ईश्वर 'master of cows.' So also गवामधिपतिः or गोष्वधिपतिः, गवां दायादः or गोषु दायादः, गवां or गोषु साक्षी, प्रतिभूः &c.

These words naturally would have governed the Genitive; the present sûtra ordains Locative as well.

आयुक्तकुशलाभ्यां चासेवायाम् ॥ ४० ॥ पदानि ॥ आयुक्त-कुशलाभ्यां, च, असेवायाम्, (षष्ठी सप्तमी) ॥

वृत्तिः ॥ आयुक्तो व्यापारितः कुशलो निपुणः ताभ्यां योगे आसेवायां गम्यमानायां षष्ठी सप्तम्यौ विभक्ती भवतः ॥

40. In conjunction with the words âyukta 'engaged,' and kuśala 'skilful,' when meaning entire absorption in an engagement, the sixth and the seventh case-affixes are used after a word.

Ex. आयुक्तः कुशलो वा कटकरणे कटकरणस्य वा 'deeply absorbed in mat-making.'

When not meaning 'deeply absorbed,' the construction is different; as आयुक्तो गौः शकटे 'the cow is slightly yoked to the cart.' Here the seventh case-affix only is employed.

यतश्च निर्द्धारणम् ॥ ४१ ॥ पदानि ॥ यतः, च, निर्द्धारणम्, (षष्ठी-सप्तमी) ॥

वृत्तिः ॥ यतो निर्द्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः ॥

41. The sixth and the seventh case-affixes are used after those words from which specification is made, (as of an individual from the whole class).

Ex. गवां गोषु वा कृष्णा बहुक्षीरा: 'among cows the black one gives much milk.' मनुष्याणां or मनुष्येषु क्षत्रिय: शूरतम: .

A nirdhârana or specification is made by separating one from the many by reason of its genus, quality and action (II. 2. 10).

पञ्चमी विभक्ते ॥ ४२ ॥ पदानि ॥ पञ्चमी, विभक्ते, (यतश्च निर्द्धारणम्) ॥

वृत्तिः ॥ यस्मिन्निर्द्धारणाश्रये विभक्तमस्ति ततः पञ्चमी विभक्तिर्भवति ॥ विभागो विभक्तं ॥

42. The fifth case-affix is employed when the thing specified is different or divided from (and not included in) that from which specification is intended.

This debars the sixth and the seventh case-affixes, as, माथुरा: पाटलिपुत्रेभ्य: सुकुमारतरा: 'Mathura is more beautiful than Pâtaliputra.'

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ ४३ ॥ पदानि ॥ साधु-निपुणाभ्यां, अर्चायाम्, सप्तमी-अप्रतेः ॥

वृत्तिः ॥ साधु निपुण इत्येताभ्यां योगेऽर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति न चेत्, प्रतिः प्रयुज्यते ॥

43. In conjunction with the words sâdhu 'good,' and nipuṇa 'skillful,' when they denote respect, the seventh case-affix is employed; provided that the word prati is not used.

मातरि साधु: or निपुण: 'good behaved towards his mother'? But साधुर्देवदत्तो मातरं प्रति 'Devadatta is good behaved towards his mother.'

Why do we say 'when respect is denoted'? Observe, साधुर्भृत्यो राज्ञ: 'the servant is good towards the king.' Here it is a bare statement of a fact.

The exception applies not only to प्रति but to other prepositions, like परि, अनु &c., as, मातरं परि साधुर्देवदत्त: ॥

प्रसितोत्सुकाभ्यां तृतीया च, ॥ ४४ ॥ पदानि ॥ प्रसित-उत्सुकाभ्यां, तृतीया, च, (सप्तमी) ॥

वृत्तिः ॥ प्रसित उत्सुक इत्येताभ्यां योगे तृतीया विभक्तिर्भवति चकारात्सप्तमी च ॥

44. In conjunction with the words prasita 'longing for,' and utsuka 'greatly desirous of,' the third case-affix is used after a word, as well as the seventh.

Ex. निद्रायां निद्रया वा उत्सुक: 'longing for sleep.' केशै: or केशेषु प्रसित:

नक्षत्रे च लुपि ॥ ४५ ॥ पदानि ॥ नक्षत्रे, च, लुपि, (तृतीया सप्तमी) ॥

वृत्तिः ॥ लुबन्तान्नक्षत्रशब्दात् तृतीयासप्तम्यौ विभक्ती भवतः ॥

45. When an affix declaring the time of an Asterism is elided by lup (IV. 2. 4); the seventh and the third case-affixes are used after the word, whose affix is so elided.

Ex. पुष्येण पुष्ये वा पायसमश्नीयात् 'when the moon is in the Asterism of Pushya, let him drink milk.' See Rules IV. 2. 4 and IV. 2. 5. So also मघाभिः पललौदनं मघासु पललौदनम्. But not so here पंचालेषु वसति 'he lives in Panchâla'. Here the country is meant, and not a star, though here also there is elision of the Taddhita affix.

Why do we say 'lup elision'? Observe मघासु ग्रहः 'the planet in the Maghâ.' Here there is no elision. But why not in अद्यपुष्यः, अद्यकृत्तिका. Because they do not denote location, which is understood. It is when location is expressed by such words that we may use the third case-affix in the alternative.

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ ४६ ॥ पदानि ॥ प्रातिपदिक-अर्थ-लिङ्ग-परिमाण-वचन-मात्रे, प्रथमा ॥

वृत्तिः ॥ प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमा विभक्तिर्भवति ॥

46. Where the sense is that of the Nominal-stem (I. 2. 45) or of gender only, or measure only or number only, the first case-affix is employed.

Ex. उच्चैः 'aloft,' नीचैः 'below,' कुमारी 'virgin,' वृक्षः 'tree,' कुण्डं 'owl,' द्रोणः 'a measure'. By 'number' grammatical number is meant; as एकः 'one,' द्वौ 'two,' बहवः 'many'.

The sense of a Prâtipadika is to denote mere existence. Genders are three, masculine, feminine and neuter. Measures are such as droṇa, khâri, âḍhaka &c.. Numbers are singular, dual and plural. The Nipatas which do not denote anything are also Prâtipadika.

संबोधने च ॥ ४७ ॥ पदानि ॥ सम्बोधने, च (प्रथमा) ॥

वृत्तिः ॥ संबोधने च प्रथमा विभक्तिर्भवति ॥

47. And when the sense is that of addressing, the first case-affix is employed.

Ex. हे राम 'O Ram' हे रामौ, हे रामाः ॥

साऽऽमन्त्रितम् ॥ ४८ ॥ पदानि ॥ सआमन्त्रितम् (सम्बोधने प्रथमा) ॥

वृत्तिः ॥ संबोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं भवति

48. The word ending with the first case-affix, in the sense of addressing, is called Amantrita or vocative (VIII. 2 .78).

एकवचनं संबुद्धिः ॥ ४९ ॥ पदानि ॥ एकवचनं सम्बुद्धिः, (आमन्त्रितम् प्रथ०) ॥

वृत्तिः ॥ आमन्त्रितप्रथमाया यदेकवचनं तत्संबुद्धिसंज्ञं भवति ॥

49. In the sense of vocative, the singular number of the first case-affix is called Sambuddhi.

The vocative singular is called sambuddhi, when it is employed in the vocation. Thus VI. 1. 69 declares 'after an inflection base ending in एङ् or in a short vowel, a consonant is elided if it be that of Sambuddhi' as हे राम ॥

षष्ठी शेषे ॥ ५० ॥ पदानि ॥ षष्ठी, शेषे ॥

वृत्तिः ॥ कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबन्धादिः शेषस्तत्र षष्ठी विभक्तिर्भवति ॥

50. The sixth case-affix is employed in the remaining cases, that is to say, where there is a sense, such as the relation between property and its owner, &c. different from that of a word related to a verb and from that of a Nominal-stem.

Ex. राज्ञः पुरुषः 'the king's man' पशोः पादः 'beast's foot' पितुः पुत्रः father's son.'

ज्ञोऽविदर्थस्य करणे ॥ ५१ ॥ पदानि ॥ ज्ञः, अविदर्थस्य, करणे, (षष्ठी) ॥

वृत्तिः ॥ जानातेरविदर्थस्याज्ञानार्थस्य करणे कारके षष्ठी विभक्तिर्भवति ॥

51. Of the verb ज्ञा jñâ, when not used in the sense of 'to know,' the instrument takes the sixth case-affix.

Ex. मधुनो जानीते 'he engages in sacrifice with honey'. So also सर्पिषो जानीते. The verb ज्ञा when not meaning 'to know', has the significance of

' to act, or to engage in;' or it may denote ' false knowledge'; as, सर्पिषि रक्तः प्रतिहतो वा. Compare I. 3. 45.

But not so here स्वरेण पुत्रं जानाति 'he recognises the son by the voice.'

अधीगर्थदयेशां कर्मणि ॥ ५२ ॥ पदानि ॥ अधि-इक्-अर्थ-दय-ईशां, कर्मणि, (षष्ठी) ॥

वृत्तिः ॥ अधीगर्थाः स्मरणार्थाः । दय दानगतिरक्षणेषु । ईश ऐश्वर्ये । एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति ॥

52. Of the verbs having the sense of ' remembering,' (adhīk) and of daya ' to give,' ' to pity ' ' to protect,' 'to move,' and of īśa ' to rule or be master of,' the object takes the sixth case-affix.

Ex. मातुः स्मरति 'he remembers the mother,' सर्पिषो दयते 'he gives clarified butter,' नायं गात्राणामीष्टे 'he can not rule his limbs.' But not so here मातुर्गुणैः स्मरति because गुण here is not the object. The word शेष is also understood here. So that the cases not otherwise provided for, take this case. So that मातरं स्मरति is also allowed.

कृञः प्रतियत्ने ॥ ५३ ॥ पदानि ॥ कृञः, प्रतियत्ने, (कर्मणि शेषे षष्ठी) ॥

वृत्तिः ॥ करोतेः कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति ॥

53. The object of the verb kṛi takes the sixth case-affix, when it means ' to impart a new quality or virtue ' (I. 3. 32).

Ex. एधोदकस्योपस्कुरुते ' the wood gives a new quality to the water' (or he prepares the wood and water for sacrifice). (By VI. 1. 139, स is inserted).

When प्रतियत्न is not meant, the second case-affix is employed: as कटं करोति.

The word शेष is also understood here. So that we have also एधोदकमुपस्कुरुते ॥

रुजार्थानां भाववचनानामज्वरे ॥ ५४ ॥ पदानि ॥ रुज-अर्थानां, भाववचनानाम्, अज्वरे, (कर्मणि शेषे षष्ठी) ॥

वृत्तिः ॥ रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति ॥

वार्त्तिकम् ॥ अज्वरि संताप्योरिति वक्तव्यम् ॥

54. The object of verbs having the sense of ruj 'to afflict,' with the exception of the Causative verb jvaraya 'to be feverish,' takes the sixth case-affix, when the verb expresses a condition (i. e., when the subject is an Abstract noun).

Ex. चौरस्य रुजति रोगः 'the disease afflicts the thief' चौरस्यामयति आमयः ।

Why do we say 'when the subject is an Abstract noun'? Observe नदी कूलानि रुजति 'the river breaks the banks.' So also not here चौरं ज्वरयति ज्वरः 'the fever burns the thief.' So also when the verb संताप is used, चौरं संतापयति तापः ।

The word शेष is also understood here. Thus चौरं रुजति रोगः ॥

आशिषि नाथः ॥ ५५ ॥ पदानि ॥ आशिषि, नाथः (कर्मणि शेषे षष्ठी) ॥

वृत्तिः ॥ नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु पठ्यते , तस्याशीःक्रियस्य कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति ॥

55. Of the verb nâth when meaning 'to bless'; the object takes the sixth case-affix.

Ex. मधुनो नाथते 'he blesses the honey.' But माणवकमुपनाथति , अंग पुत्री-काधीष्व 'he solicits mânavaka saying (child) son, study.' Here नाथ does not mean to bless, and so it takes the accusative case.

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ५६ ॥ पदानि ॥ जासि-निप्रहण-नाट-क्राथ-पिषां , हिंसायाम् , (कर्मणि षष्ठी) ॥

वृत्तिः ॥ जासि निप्रहण नाट क्राथ पिष् इत्येतेषां धातूनां हिंसा क्रियाणां कर्मणि कारके षष्ठी विभक्तिर्भवति ॥

56. The object of the verbs jâsi 'to strike'; 'to hurt,' han 'to strike' preceded by नि and प्र , nâṭ to 'injure,' krâth,' and 'pish,' when they mean, 'to injure', takes the sixth case-affix.

चौरस्य योज्जासयति , निप्रहन्ति , निहन्ति , प्रहन्ति , प्रणिहन्ति , उन्नाटयति , क्राथयति , पिनष्टि वा , 'he injures the thief.'

The root जसु belonging to the Churadi class should be taken, and not Divâdi. हन with the prepositions pra and ni may be taken inany order. The root क्रथ् takes in the causative vriddhi irregularly. This verb is Bhvâdi and falls into the subdivision ghatâdi, and is called there a मित् verb; all मित् verbs shorten their penultimate before the causative affix णिच् (VI. 4. 92). Thus क्राथ is an irregularity.

Why do we say 'when meaning to injure'? Observe धानाः पिनष्टि 'he pounds the barley.'

The word शेष is also understood here as चौरमुज्जासयति. Only these govern the genitive, not so here चौरं हिनस्ति, चौरं विहन्ति ॥

व्यवहृपणोः समर्थयोः ॥ ५७ ॥ पदानि ॥ व्यवहृ-पणोः, समर्थयोः (कर्मणि षष्ठी) ॥

वृत्तिः ॥ व्यवहृ पण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके षष्ठी विभक्तिर्भवति ॥

57. The object of the verbs vyavahṛi and paṇ when they are synonymous, that is when they mean 'dealing in sale and purchase transactions' or 'staking in gambling,' takes the sixth case-affix.

Ex. शतस्य व्यवहरति or पणते 'he deals in, or stakes hundred.'

Why does not the verb पण take the affix आय्? It takes आय् when meaning 'to praise or honor,' and not in the sense of 'gambling, or bartering' &c. Not so here शलाकां व्यवहरति 'he throws the dice,' ब्राह्मणान् पणायते 'he praises the Brahmanas.' The word शेष is also here understood, so that we have शतं पणते 'he stakes a hundred.'

दिवस्तदर्थस्य ॥ ५८ ॥ पदानि ॥ दिवः, तदर्थस्य । (व्यवहृपणोः समर्थयोः कर्म०षष्ठी) ॥

वृत्तिः ॥ व्यवहृपणिसमानार्थस्य दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवति ॥

58. The object of the verb div when having the above-mentioned sense of 'dealing' or 'staking,' takes the sixth case-affix.

Ex. शतस्य दीव्यति 'he stakes or deals in hundred.' But not in ब्राह्मणं दीव्यति 'he jokes with the Brahmana.'

The yoga vibhâga, when this root might well have been included in the last aphorism, is for the sake of the succeeding sûtras, in which the anuvṛitti of दिव runs, and not of others.

विभाषोपसर्गे ॥ ५९ ॥ पदानि ॥ विभाषा, उपसर्गे, (दिवस्तदर्थस्य कर्मणि षष्ठी) ॥

वृत्तिः ॥ उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके षष्ठी विभक्तिर्भवति ॥

59. The object of the verb div when having the above-mentioned sense of dealing or staking, optionally takes the sixth case-affix, when it is preceded by an upasarga (or preposition).

Ex. शतस्य शतं वा प्रति दीव्यति 'he deals in or stakes a hundred.' But no option is allowed when the verb is simple as in the last aphorism; nor does this rule apply when the sense is not that of dealing or gambling. As, शलाकां प्रति दीव्यति 'he throws the missile.'

द्वितीया ब्राह्मणे ॥ ६० ॥ पदानि ॥ द्वितीया, ब्राह्मणे, (दिवस्तदर्थस्य कर्मणि) ॥

वृत्तिः ॥ ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति ॥

60. The object of the verb div when having the above-mentioned sense of 'dealing' or 'staking' takes the second case-affix in the Brahmana literature.

Ex. गामस्य तदहः सभायां दीव्येयुः (Maitr. S. 1. 6. 11) In the Vedic literature the simple verb div takes the accusative instead of the genitive. And with upasarga it is optional. The anuvṛitti of the word शेष does not extend to this sûtra, or the following.

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ ६१ ॥ पदानि ॥ प्रेष्य-ब्रुवोः, हविषः, देवता-सम्प्रदाने (षष्ठी कर्मणि) ॥

वृत्तिः ॥ प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठी विभक्तिर्भवति देवता संप्रदानेसति ॥

61. The object of the verb preshya and brûhi (imperative singular of Divâdi verb, meaning 'send' and 'utter,') denoting sacrificial food, takes the sixth case-affix, when making offerings to deity is meant or when deity is the recepient.

Ex. अग्नये छागस्य हविषोवपाया मेदसोऽनुब्रूहि प्रेष्य वा 'send to fire as oblation, the goat, the fat, and the marrow.' But not here:—अग्नये छागं हविर्वपां मेदो जुहुधि. Because the verb is not preshya or bruhi. So also not here अग्नये गोमयान् प्रेष्य. Because it is not an oblation. Not here too माणवकाय पुरोडाशं प्रेष्य. Because the recepient is not a diety. Compare VIII. 2. 91.

Vart:—This rule does not apply when the word प्रस्थित 'set out' qualifies the word हविः as; इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य 'send to Indra and Agni the oblation set out for them' &c.

चतुर्थ्यर्थे बहुलं छन्दसि ॥ ६२ ॥ पदानि ॥ चतुर्थी-अर्थे, बहुलं, छन्दसि (षष्ठी) ॥

वृत्तिः ॥ छन्दसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलम् ॥

वार्त्तिकम् ॥ षष्ठ्यर्थे चतुर्थी वक्तव्या ॥

62. In the chhandas the sixth case-affix is employed diversely with the force of the fourth case-affix.

Ex. पुरुषमृगश्चन्द्रमसः or चन्द्रमसे 'to the moon, a male deer.' गोधा कालका दार्वाघाटस्ते वनस्पतीनाम् or वनस्पतिभ्यः 'to you lords of the forest, are lizard, kâlaka bird, &c. So also वायुरस्मा उपा मन्थत् (R. Ved. X. 136. 7).

Why do we say 'diversely?' Observe कृष्णोरात्र्यै, हिमवतो हस्ती.

Vart:—In the Veda, the 4th case-affix is employed in the sense of the sixth: as या खर्वेण पिबति तस्यै खर्वोजायते 'who soever woman drinks with a woman in her courses, gets herself in menstrua. So also या दतो धावति तस्यै श्यावदन् 'who cleans her teeth, her teeth become black.' या नखानि कृन्तति तस्यै कुनखः 'who pairs her nails, her nails become ugly.' So on, in याऽङ्क्ते तस्यै काणः याऽभ्यङ्क्ते तस्यै दुश्चर्मा, या केशान् प्रलिखति तस्यै खलति ॥ अहल्यायै जारः (T. S. 2. 5. 1. 7).

यजेश्च करणे ॥ ६३ ॥ पदानि ॥ यजेः, च, करणे, (षष्ठी) ॥

वृत्तिः ॥ यजेर्धातोः करणे कारके छन्दसि बहुलं षष्ठी विभक्तिर्भवति ॥

63. The sixth case-affix is diversely employed in the chhandas in denoting the instrument of the verb yaj 'to sacrifice.'

Ex. घृतस्य or घृतेन यजते 'he sacrifices with butter.' सोमस्य or सोमेन यजत ॥

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥ ६४ ॥ पदानि ॥ कृत्वो-अर्थप्रयोगे, काले, अधिकरणे (षष्ठी) ॥

वृत्तिः ॥ कृत्वोऽर्थानां प्रत्ययानां प्रयोगे कालेऽधिकरणे षष्ठी विभक्तिर्भवति ॥

64. The sixth case-affix is employed in denoting location (adhikaraṇa) after a word denoting time (kâla) when used along with a word ending with an affix having the sense of kritvasuch (V. 4. 17) 'so many times.'

Ex. पंचकृत्वोऽह्नोभुंक्ते 'he eats five times a day.' In short, 'words meaning so many times, or the numeral adverbs of frequency, govern the genitive of time in the sense of locative.' As द्विरह्नोऽधीते 'he studies twice in a day.'

Why do we say 'having the force of कृत्वसुच्?' Observe अह्नि शेते 'he sleeps in the day.'

This rule will not apply when the adverb of frequency is understood, not expressed (prayoga) as in अहनि भुक्तम्. Nor when the time is not meant, as द्विः कांस्यपात्र्यां भुंक्ते 'he eats in two brass vessels.' So also when location is

not meant: as द्विरह्नो भुंक्ते. The शेष being understood we have द्विरह्नयधीते.

कर्तृकर्मणोः कृति ॥ ६५ ॥ पदानि ॥ कर्तृ-कर्मणोः, कृति। (षष्ठी) ॥

वृत्तिः ॥ कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति ॥

65. The sixth case affix is employed after a word, in denoting the agent and the object, when used along with a word ending with a kṛit affix (III. 1. 93).

Ex. कृतिः कालिदासस्य 'the composition of Kalidâsa.' आहर्ता क्रतूनां 'the performer of sacrifice.' So also भवतः शायिका 'your turn of lying down.' अपां स्रष्टा, पुरां भेत्ता वज्रस्य भर्ता. But not in शस्त्रेणभेत्ता 'cutting with weapon.'

Why do we say 'kṛit?' Not so when a Taddhita-affix is employed as कृतपूर्वीकटं. In other words, the genitive in Sanskrit is both subjective and objective.

उभयप्राप्तौ कर्मणि ॥ ६६ ॥ उभयप्राप्तौ, कर्मणि, (कृति षष्ठी) ॥

वृत्तिः ॥ उभयोः प्राप्तिर्यस्मिन्कृति सोयमुभयप्राप्तिस्तत्रकर्मण्येव षष्ठी विभक्तिर्भवति, न कर्तरि ॥

वार्त्तिकम् ॥ अकाकारयोः स्त्री प्रत्यययोः प्रयोगे नेति वक्तव्यम् ॥

वार्त्तिकम् ॥ शेषे विभाषा ॥

66. When the agent and the object of the action denoted by the words formed by kṛit-affixes, are both used in a sentence, in the object only, the sixth case-affix is employed, and not in the agent (the object is put in the genitive case and not the agent).

आश्चर्यो गवां दोहोऽगोपालकेन 'the milking of a cow without a cowherd is a wonder.' रोचते मे ओदनस्य भोजनं देवदत्तेन 'The eating of rice by Devadatta pleases me;' पयसः पानं यज्ञदत्तेन 'the drinking of milk by Yajñadatta.'

Vart:—'When the agent and object are both used, the agent is put in the instrumental, or genitive case, when, as some say, the kṛit terminations are of the feminine gender, or as others say, when the terminations are of any gender; as, विचित्रा जगतः कृतिर्हरेर्हरिणा वा 'the creation of the world by Hari is wonderful.' शब्दानामनुशासनमाचार्येण आचार्यस्य वा 'the dissertation on words by the Âchârya' विचित्राहि सूत्रस्य कृतिः पाणिनेः or पाणिनिना 'beautiful is the structure of sûtra by Panini.' Apte.

क्तस्य च, वर्त्तमाने ॥ ६७ ॥ पदानि ॥ क्तस्य, च, वर्त्तमाने (षष्ठी) ॥

वृत्तिः ॥ क्तस्य वर्तमानकालविहितस्य प्रयोगे षष्ठी विभक्तिर्भवति ॥

वार्त्तिकम् ॥ नपुंसके भावउपसंख्यानम् ॥

वार्त्तिकम् ॥ शेषविज्ञानात् सिद्धम् ॥

67. The past participle ending in क्त when used in the sense of the present tense, (III. 2. 187 and 188) is used with the genitive.

Ex. राज्ञां पूजितः 'honored by kings,' अहमेवमतो महीपतेः 'I alone am regarded by the king.'

Why do we say 'क्त'? Observe ओदनं पच्यमानः 'rice is cooked.' Why do we say 'when denoting the present tense'? Observe ग्रामं गतः 'gone to the village.'

Vart:—When used as abstract neuter nouns, past participles are used with the genitive, as मयूरस्य नृत्तं 'the dancing of a peacock.' छात्रस्य हसितं 'the laughing of the students.' कोकिलस्य व्याहृतम् 'the screaming of the cuckoo.' When, however, agent is desired to be particularised, the instrumental case is employed: as छात्रेण हसितम्.

This sûtra debars sûtra 69 by which genitive is prohibited after Nishṭhâ affixes. This is an exception to that sûtra.

अधिकरणवाचिनश्च ॥ ६८ ॥ पदानि ॥ अधिकरणवाचिनः, च ; (षष्ठी) ॥

वृत्तिः ॥ क्तोऽधिकरणे चेति वक्ष्यति तस्य प्रयोगे षष्ठी विभक्तिर्भवति ॥

68. The past participle in क्त is used with the genitive when the former expresses location (III. 4. 76).

This also is an exception to the prohibition about Nishṭhâ contained in II. 3. 69. As इदमेषामासितम् 'this is their seat.' इदमेषां शयितं 'this is their sleeping.'

In connection with verbs taking two objects, both take the genitive case, when a word ending in kṛit-affix denotes the agent, as they would have taken the accusative: as, नेताऽश्वस्य ग्रामस्य चैत्रः 'Chaitra is the leader of the horse of the village.' When, however, one is the principal, then the object takes the genitive: as, नेताऽश्वस्य ग्रामं चैत्रः, 'Chaitra leads the horse to the village.'

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ ६९ ॥ पदानि ॥ न, ल-उ-उक-अव्यय-निष्ठा-खलर्थ-तृनाम्, (षष्ठी) ॥

वृत्तिः ॥ ल उ उक अव्यय निष्ठा खलर्थ तृन् इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति ॥

वार्त्तिकम् ॥ उक प्रतिषेधे कमेर्भाषायामप्रतिषेधः ॥

वार्त्तिकम् ॥ अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ॥

वार्त्तिकम् ॥ द्विषः शतुर्वा वचनम् ॥

